श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ नासदीयसूक्तम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ नासदीयसूक्तम् ॥

नास॑दासी॒न्नो सदा॑सीत्त॒दानी᳚म्।
नासी॒द्रजो॒ नो व्यो॑मा प॒रो यत्।
किमाव॑रीवः॒ कुह॒कस्य॒ शर्म॑न्।
अम्भः॒ किमा॑सीद्ग॒हनं॑ गभी॒रम्।
न मृ॒त्युर॒मृतं॒ तर्हि॒ न।
रात्रि॑या॒ अह्न॑ आसीत्प्रके॒तः।
आनी॑दवा॒तग्ग्॒ स्व॒धया॒ तदेक᳚म्।
तस्मा᳚द्धा॒न्यं न प॒रः किञ्च॒नास॑।
तम॑ आसी॒त्तम॑सा गू॒ढमग्रे᳚ प्रके॒तम्।
स॒लि॒लग्ं सर्व॑मा इ॒दम्॥ 1॥

तु॒च्छेना॒भ्वपि॑हितं॒ यदासी᳚त्।
तम॑स॒स्तन्म॑हि॒ना जा॑य॒तैक᳚म्।
काम॒स्तदग्रे॒ सम॑वर्त॒ताधि॑।
मन॑सो॒ रेतः॑ प्रथ॒मं यदासी᳚त्।
स॒तो बन्धु॒मस॑ति॒ निर॑विन्दन्।
हृ॒दि प्र॒तीष्या॑ क॒वयो॑ मनी॒षा।

sunder kidambi
prapatti dot com
sunder kidambi

ति॒र॒श्चीनो॒ वित॑तो र॒श्मिरे॑षाम्।
अ॒धस्वि॑दा॒सी(३)दु॒परि॑स्विदासी(३)त्।
रे॒तो॒धा आ॑सन्महि॒मा न॑ आसन्।
स्व॒धा अ॒वस्ता॒त्प्रय॑तिः प॒रस्ता॑त्॥ **2**॥

को अ॒द्धा वे॑द॒ क इ॒ह प्रवो॑चत्।
कुत॒ आजा॑ता॒ कुत॑ इ॒यं विसृ॑ष्टिः।
अ॒र्वाग्दे॒वा अ॒स्य वि॒सर्ज॑नाय।
अथा॒ को वे॑द॒ यत॑ आब॒भूव॑।
इ॒यं विसृ॑ष्टि॒र्यत॑ आब॒भूव॑॥ **3**॥

यदि॑ वा द॒धे यदि॑ वा॒ न।
यो अ॒स्याध्य॑क्षः पर॒मे व्यो॑मन्।
सो अ॒ङ्ग वे॑द॒ यदि॑ वा॒ न वेद॑।
किग्ग्॒स्वि॒द्व॒नं॑ क उ॒स वृ॒क्ष आ॑सीत्।
यतो॒ द्यावा॑पृथि॒वी नि॑ष्टत॒क्षुः॥ **4**॥

मनी॑षिणो॒ मन॑सा पृ॒च्छतेदु॒ तत्।
यद॒ध्यति॑ष्ठ॒द्भुव॑नानि धा॒रयन्॑।
ब्रह्म॒ वनं॑ ब्रह्म॒ सवृ॒क्ष आ॑सीत्।
यतो॒ द्यावा॑पृथि॒वी नि॑ष्टत॒क्षुः।
मनी॑षिणो॒ मन॑सा विब्र॑वीमि वः।
ब्रह्मा॒ध्यति॑ष्ठ॒द्भुव॑नानि धा॒रयन्॑॥ **5**॥



sunder kidambi
prapatti dot com
sunder kidambi

ओं शान्ति॒ः शान्ति॒ः शान्तिः॑ ॥

**॥ इति नासदीयसूक्तं समाप्तम् ॥**

sunder kidāmbi
prapatti dot com
sunder kidāmbi